# Vyasakritam Vishnu Stotram

# व्यसकृतं विष्णुस्तोत्रम्

## Document Information

Text title : Vyasakritam Vishnu Stotram

File name : vyasakRRitaMviShNustotram.itx

Category : vishhnu, vishnu, brahmapurANa, stotra

Location : doc_vishhnu

Proofread by : PSA Easwaran

Description/comments : brahmapurANa | adhyAya 180/1-12||

Latest update : September 29, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 29, 2024

*sanskritdocuments.org*

# व्यसकृतं विष्णुस्तोत्रम्

व्यास उवाच ।
नमस्कृत्वा सुरेशाय विष्णवे प्रभविष्णवे
पूरुषाय पुराणाय शाश्वतायाव्ययाय च ॥ १॥

चतुर्व्यूहात्मने तस्मै निर्गुणाय गुणाय च ।
वरिष्ठाय गरिष्ठाय वरेण्यायामिताय च ॥ २॥

यज्ञाङ्गायाखिलाङ्गाय देवाद्यैरीप्सिताय च ।
यस्मादणुतरं नास्ति यस्मान्नास्ति बृहत्तरम् ॥ ३॥

येन विश्वमिदं व्याप्तमजेन सचराचरम् ।
आविर्भावतिरोभावदृष्टादृष्टविलक्षणम् ॥ ४॥

वदन्ति यत्सृष्टमिति तथैवाप्युपसंहृतम् ।
ब्रह्मणे चाऽऽदिदेवाय नमस्कृत्य समाधिना ॥ ५॥

अविकाराय शुद्धाय नित्याय परमात्मने ।
सदैकरूपरूपाय जिष्णवे विष्णवे नमः ॥ ६॥

नमो हिरण्यगर्भाय हरये शङ्कराय च ।
वासुदेवाय ताराय सर्गस्थित्यन्तकारिणे ॥ ७॥

एकानेकस्वरूपाय स्थूलसूक्ष्मात्मने नमः ।
अव्यक्तव्यक्तभूताय विष्णवे मुक्तिहेतवे ॥ ८॥

सर्गस्थितिविनाशानां जगतो यो जगन्मयः ।
मूलभूतो नमस्तस्मै विष्णवे परमात्मने ॥ ९॥

आधारभूतं विश्वस्याप्यणीयांसमणीयसाम् ।
प्रणम्य सर्वभूतस्थमच्युतं पुरुषोत्तमम् ॥ १०॥

ज्ञानस्वरूपमत्यन्तं निर्मलं परमार्थतः ।

तमेवार्थस्वरूपेण भ्रान्तिदर्शनतः स्थितम् ॥ ११॥

विष्णुं ग्रसिष्णुं विश्वस्य स्थितिसर्गे तथा प्रभुम् ।
अनादिं जगतामीशमजमक्षयमव्ययम् ॥ १२॥

इति ब्रह्मपुराणे अशीत्यधिकशततमाध्यायान्तर्गतं
व्यसकृतं विष्णुस्तोत्रं समाप्तम् ।

ब्रह्मपुराण । अध्याय १८०/१-१२॥

brahmapurANa . adhyAya 180/1-12..

Proofread by PSA Easwaran

*Vyasakritam Vishnu Stotram*

pdf was typeset on September 29, 2024

Please send corrections to *sanskrit@cheerful.com*